| | | |
|---|---|---|
| ऋषिः दीर्घतमाः औचथ्यः | छन्दः विराट् | देवता अग्निः |

म॒हः स रा॒य एष॑ते॒ पति॒र्दन्नि॒न इ॒नस्य॒ वसु॑नः प॒द आ । उप॒ ध्रज॑न्त॒मद्र॑यो वि॒धन्नित् ॥ 1 ॥

स यो वृषा॑ न॒रां न रोद॑स्यो॒ः श्रवो॑भि॒रस्ति॑ जी॒वपी॑तसर्गः। प्र यः स॑स्रा॒णः शि॑श्री॒त योनौ॑ ॥ 2 ॥

आ यः पुरं॒ नार्म॑णी॒मदी॑दे॒दत्यः॑ क॒विर्न॑भ॒न्यो॒३ नार्वा॑ । सूरो॒ न रु॑रु॒क्वाञ्छ॒तात्मा॑ ॥ 3 ॥

अ॒भि द्वि॒जन्मा॒ त्री रो॑च॒नानि॒ विश्वा॒ रजां॑सि शुशुचा॒नो अ॑स्थात् ।
होता॒ यजि॑ष्ठो अ॒पां स॒धस्थे॑ ॥ 4 ॥

अ॒यं स होता॒ यो द्वि॒जन्मा॒ विश्वा॑ द॒धे वार्या॑णि श्रव॒स्या । मर्तो॒ यो अ॑स्मै सु॒तुको॑ द॒दाश॑ ॥ 5 ॥